# Shri Nilakantha Chintana Ashtakam

# શ્રીનીલકણ્ઠ ચિન્તનાષ્ટકમ્

## Document Information

Text title : Shri Nilakantha Chintana Ashtakam

File name : nIlakaNThachintanAShTakam.itx

Category : vishhnu, svAminArAyaNa, krishna, gurudev, aShTaka

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શ્રીનીલકણ્ઠ ચિન્તનાષ્ટકમ્

(ઉપજાતિ વૃત્તમ્)
બ્રાહ્મે મુહૂર્તે શયનં વિહાય
નિજસ્વરૂપં હૃદિ ચિન્તયિત્વા ।
સ્નાતં વિશુદ્ધં પ્રચુરાભિરદ્ભિઃ
શ્રીનીલકણ્ઠ હૃદિ ચિન્તયામિ ॥ ૧॥

શ્વેતં ચ સૂક્ષ્મં પરિધાય વાસઃ
સિતં દ્વિતીયં વસનં વસિત્વા ।
ચતુષ્ક-પીઠાદ્ દ્રુતમુત્તરન્તં
શ્રીનીલકણ્ઠં હૃદિ ચિન્તયામિ ॥ ૨॥

આશૂપવિશ્યા-મલનૈજપીઠે
વિધાય સન્નૈષ્ઠિક-કર્મ નિત્યમ્ ।
નારાયણં માલિકયા સ્મરન્તં
શ્રીનીલકણ્ઠં હૃદિ ચિન્તયામિ ॥ ૩॥

સુગન્ધિના કેસર-ચન્દનેન
સન્મલ્લિકા-ચમ્પકપુષ્પહારૈઃ ।
સમ્પૂજ્યમાનં નિજભક્તવર્યૈઃ
શ્રીનીલકણ્ઠં હૃદિ ચિન્તયામિ ॥ ૪॥

કર્ણે દધાનં કુસુમાવતંસં
શિરઃપટે કૌસુમ-શેખરાલિમ્ ।
કણ્ઠે ચ નાનાવિધ-પુષ્પહારાન્
શ્રીનીલકણ્ઠં હૃદિ ચિન્તયામિ ॥ ૫॥

ભક્ષ્યૈશ્ચ ભોજ્યૈઃ સહ લેહ્યચોષ્યૈ-
ર્દૃષ્ટ્વા પુરા ભોજનભાજનં ચ ।
પૂરી-મદન્તં ચ સસૂપભક્તં

શ્રીનીલકણ્ઠં હૃદિ ચિન્તયામિ ॥ ૬॥

ભક્તૈરનેકૈર્મુનિભિર્ગૃહસ્થૈર્
વૃત્તં સભાયાં ભગણૈરિવેન્દુમ્ ।
સહાસ-વક્ત્રામ્બુજ-ચારુનેત્રં
શ્રીનીલકણ્ઠં હૃદિ ચિન્તયામિ ॥ ૭॥

નિઃસીમ-કારુણ્ય-સુધામયેન
વિલોકનેનાતિમુદા સ્વભક્તમ્ ।
બદ્ધાઞ્જલિં દીનમવેક્ષમાણં
શ્રીનીલકણ્ઠં હૃદિ ચિન્તયામિ ॥ ૮॥

શ્રીદીનાનાથભટ્ટવિરચિતં શ્રીનીલકણ્ઠચિન્તનાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Nilakantha Chintana Ashtakam*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*